# श्रीविलापकुसुमाञ्जलिः

Śrī-vilāpa-kusumāñjaliḥ

त्वं रूपमञ्जरि सखि प्रथिता पुरेऽस्मिन्
पुंसः परस्य वदनं न हि पश्यसीति।
बिम्बाधरे क्षतमनागतभर्तृकाया
यत्ते व्यधायि किमु तच्छुकपुङ्गवेन॥ १॥ (वसन्ततिलकं)

tvaṁ rūpa-mañjari sakhi prathitā pure'smin
puṁsaḥ parasya vadanaṁ na hi paśyasīti ।
bimbādhare kṣatam anāgata-bhartṛkāyā
yat te vyadhāyi kim u tac-chuka-puṅgavena ।।1।। (vasanta-tilakam)

स्थलकमलिनि युक्तं गर्विता काननेऽस्मिन्
प्रणयसि वरहास्यं पुष्पगुच्छच्छलेन।
अपि निखिललतास्ताः सौरभाक्ताः स मुञ्चन्
मृगयति तव मार्गं कृष्णभृङ्गो यदद्य॥ २॥ (मालिनी)

sthala-kamalini yuktaṁ garvitā kānane'smin
praṇayasi vara-hāsyaṁ puṣpa-guccha-cchalena ।
api nikhila-latās tāḥ saurabhāktāḥ sa muñcan
mṛgayati tava mārgaṁ kṛṣṇa-bhṛṅgo yad adya ।।2।। (mālinī)

व्रजेन्द्रवसतिस्थले विविधवल्लवीसङ्कुले
त्वमेव रतिमञ्जरि प्रचुरपुण्यपुञ्जोदया।
विलासभरविस्मृतप्रणयिमेखलामार्गणे
यदद्य निजनाथया व्रजसि नाथिता कन्दरम्॥ ३॥ (पृथ्वी)

vrajendra-vasati-sthale vividha-vallavī-saṅkule
tvam eva rati-mañjari pracura-puṇya-puñjodayā ।
vilāsa-bhara-vismṛta-praṇayi-mekhalā-mārgaṇe
yad adya nija-nāthayā vrajasi nāthitā kandaram ।।3।। (pṛthvī)

प्रभुरपि यदुनन्दनो य एष
प्रिययदुनन्दन उन्नतप्रभावः।
स्वयमतुलकृपामृताभिषेकं
मम कृतवांस्तमहं गुरुं प्रपद्ये॥४॥ (पुष्पिताग्रा)

prabhur api yadunandano ya eṣa
priya-yadunandana unnata-prabhāvaḥ |
svayam atula-kṛpāmṛtābhiṣekaṁ
mama kṛtavāṁs tam ahaṁ guruṁ prapadye ||4|| (puṣpitāgrā)

यो मां दुस्तरगेहनिर्जलमहाकूपादपारक्लमात्
सद्यः सान्द्रदयाम्बुधिः प्रकृतितः स्वैरी कृपारज्जुभिः।
उद्धृत्यात्मसरोजनिन्दिचरणप्रान्तं प्रपाद्य स्वयं
श्रीदामोदरसाच्चकार तमहं चैतन्यचन्द्रं भजे॥५॥ (शार्दूलविक्रीडितं)

yo māṁ dustara-geha-nirjala-mahā-kūpād apāra-klamāt
sadyaḥ sāndra-dayāmbudhiḥ prakṛtitaḥ svairī kṛpā-rajjubhiḥ |
uddhṛtyātma-saroja-nindi-caraṇa-prāntaṁ prapādya svayaṁ
śrī-dāmodara-sāc-cakāra tam ahaṁ caitanya-candraṁ bhaje ||5|| (śārdūlavikrīḍitam)

वैराग्ययुग्भक्तिरसं प्रयत्नै-
रपाययन्मामनभीप्सुमन्धम्।
कृपाम्बुधिर्यः परदुःखदुःखी
सनातनं तं प्रभुमाश्रयामि॥६॥ (उपजातिः)

vairāgya-yug-bhakti-rasaṁ prayatnair
apāyayan mām anabhīpsum andham |
kṛpāmbudhir yaḥ para-duḥkha-duḥkhī
sanātanaṁ taṁ prabhum āśrayāmi ||6|| (upajātiḥ)

अत्युत्कटेन नितरां विरहानलेन
दन्दह्यमानहृदया किल कापि दासी।
हा स्वामिनि क्षणमिह प्रणयेन गाढ-
माक्रन्दनेन विधुरा विलपामि पद्यैः॥७॥ (वसन्ततिलकं)

atyutkaṭena nitarāṁ virahānalena
dandahyamāna-hṛdayā kila kāpi dāsī ǀ
hā svāmini kṣaṇam iha praṇayena gāḍham
ākrandanena vidhurā vilapāmi padyaiḥ ǀǀ7ǀǀ (vasanta-tilakam)

देवि दुःखकुलसागरोदरे
दूयमानमतिदुर्गतं जनम्।
त्वं कृपाप्रबलनौकयाद्भुतं
प्रापय स्वपदपङ्कजालयम्॥८॥ (रथोद्धता)

devi duḥkha-kula-sāgarodare
dūyamānam atidurgataṁ janam ǀ
tvaṁ kṛpā-prabala-naukayādbhutaṁ
prāpaya sva-pada-paṅkajālayam ǀǀ8ǀǀ (rathoddhatā)

त्वदलोकनकालाहिदंशैरेव मृतं जनम्।
त्वत्पादाब्जमिलल्लाक्षाभेषजैर्देवि जीवय॥९॥ (अनुष्टुप्)

tvad-alokana-kālāhi-daṁśair eva mṛtaṁ janam ǀ
tvat-pādābja-milal-lākṣā-bheṣajair devi jīvaya ǀǀ9ǀǀ (anuṣṭup)

देवि ते चरणपद्मदासिकां
विप्रयोगभरदावपावकैः।
दह्यमानतरकायवल्लरीं
जीवय क्षणनिरीक्षणामृतैः॥१०॥ (रथोद्धता)

devi te caraṇa-padma-dāsikāṁ
viprayoga-bhara-dāva-pāvakaiḥ ।
dahyamānatara-kāya-vallarīṁ
jīvaya kṣaṇa-nirīkṣaṇāmṛtaiḥ ।।10।। (rathoddhatā)

स्वप्नेऽपि किं सुमुखि ते चरणाम्बुजात-
राजत्परागपटवासविभूषणेन।
शोभां परामतितरामहहोत्तमाङ्गं
बिभ्रद्भविष्यति कदा मम सार्थनाम॥११॥ (वसन्ततिलकं)

svapne'pi kiṁ sumukhi te caraṇāmbu-jāta-
rājat-parāga-paṭavāsa-vibhūṣaṇena ।
śobhāṁ parām atitarām ahahottamāṅgaṁ
bibhrad bhaviṣyati kadā mama sārtha-nāma ।।11।। (vasanta-tilakam)

अमृताब्धिरसप्रायैस्तव नूपुरसिञ्जितैः।
हा कदा मम कल्याणि वाधिर्यमपनेष्यते॥१२॥ (अनुष्टुप्)

amṛtābdhi-rasa-prāyais tava nūpura-siñjitaiḥ ।
hā kadā mama kalyāṇi vādhiryam apaneṣyate ।।12।। (anuṣṭup)

शशकभृदभिसारे नेत्रभृङ्गाञ्चलाभ्यां
दिशि विदिशि भयेनोद्घुर्णिताभ्यां वनानि।
कुवलयदलकोषाण्येव क्लृप्तानि याभ्यां
किमु किल कलनीयो देवि ताभ्यां जनोऽयम्॥१३॥ (मालिनी)

śaśaka-bhṛd-abhisāre netra-bhṛṅgāñcalābhyāṁ
diśi vidiśi bhayenodghurṇitābhyāṁ vanāni ।
kuvalaya-dala-koṣāṇy eva kḷptāni yābhyāṁ
kim u kila kalanīyo devi tābhyāṁ jano'yam ।।13।। (mālinī)

यदवधि मम काचिन्मञ्जरी रूपपूर्वा
व्रजभुवि बत नेत्रद्वन्द्वदीप्तिं चकार।
तदवधि तव वृन्दारण्यराज्ञि प्रकामं
चरणकमललाक्षासंदिदृक्षा ममाभूत्॥१४॥ (मालिनी)

yad-avadhi mama kācin mañjarī rūpa-pūrvā
vraja-bhuvi bata netra-dvandva-dīptiṁ cakāra ।
tad-avadhi tava vṛndāraṇya-rājñi prakāmaṁ
caraṇa-kamala-lākṣā-saṁdidṛkṣā mamābhūt ।।14।। (mālinī)

यदा तव सरोवरं सरसभृङ्गसङ्घोल्लसत्-
सरोरुहकुलोज्ज्वलं मधुरवारिसम्पूरितम्।
स्फुटत्सरसिजाक्षि हे नयनयुग्मसाक्षाद्बभौ
तदैव मम लालसाजनि तवैव दास्ये रसे॥१५॥ (पृथ्वी)

yadā tava sarovaraṁ sarasa-bhṛṅga-saṅghollasat-
saroruha-kulojjvalaṁ madhura-vāri-sampūritam ।
sphuṭat-sarasijākṣi he nayana-yugma-sākṣād babhau
tadaiva mama lālasājani tavaiva dāsye rase ।।15।। (pṛthvī)

पादाब्जयोस्तव विना वरदास्यमेव
नान्यत्कदापि समये किल देवि याचे।
सख्याय ते मम नमोऽस्तु नमोऽस्तु नित्यं
दास्याय ते मम रसोऽस्तु रसोऽस्तु सत्यम्॥ १६॥ (वसन्ततिलकं)

pādābjayos tava vinā vara-dāsyam eva
nānyat kadāpi samaye kila devi yāce |
sakhyāya te mama namo'stu namo'stu nityaṁ
dāsyāya te mama raso'stu raso'stu satyam ||16|| (vasanta-tilakam)

अतिसुललितलाक्षाश्लिष्टसौभाग्यमुद्रा-
ततिभिरधिकतुष्ट्या चिह्नितीकृत्य बाहू।
नखदलितहरिद्रागर्वगौरि प्रियां मे
चरणकमलसेवां हा कदा दास्यसि त्वम्॥ १७॥ (मालिनी)

ati-sulalita-lākṣāśliṣṭa-saubhāgya-mudrā-
tatibhir adhika-tuṣṭyā cihnitīkṛtya bāhū |
nakha-dalita-haridrā-garva-gauri priyāṁ me
caraṇa-kamala-sevāṁ hā kadā dāsyasi tvam ||17|| (mālinī)

प्रणालीं कीलालैर्बहुभिरभि सङ्क्षाल्य मधुरै-
र्मुदा संमार्ज्य स्वैर्विवृतकचवृन्दैः प्रियतया।
कदा बाह्यागारं वरपरिमलैर्धूपनिवहै-
र्विधास्ये ते देवि प्रतिदिनमहो वासितमहम्॥ १८॥ (शिखरिणी)

praṇālīṁ kīlālair bahubhir abhi saṅkṣālya madhurair
mudā saṁmārjya svair vivṛta-kaca-vṛndaiḥ priyatayā |
kadā bāhyāgāraṁ vara-parimalair dhūpa-nivahair
vidhāsye te devi pratidinam aho vāsitam aham ||18|| (śikhariṇī)

प्रातः सुधांशुमिलितां मृदमत्र यत्ना-
दाहृत्य वासितपयश्च गृहान्तरे च।
पादाम्बुजे तव कदा जलधारया ते
प्रक्षाल्य भाविनि कचैरिह मार्जयामि॥१९॥ (वसन्ततिलकं)

prātaḥ sudhāṁśu-militāṁ mṛdam atra yatnād
āhṛtya vāsita-payaś ca gṛhāntare ca |
pādāmbuje tava kadā jaladhārayā te
prakṣālya bhāvini kacair iha mārjayāmi ||19|| (vasanta-tilakam)

प्रक्षाल्य पादकमलं कृतदन्तकाष्ठां
स्नानार्थमन्यसदने भवतीं निविष्टाम्।
अभ्यज्य गन्धिततरैरिह तैलपूरैः
प्रोद्वर्तयिष्यति कदा किमु किङ्करीयम्॥२०॥ (वसन्ततिलकं)

prakṣālya pāda-kamalaṁ kṛta-danta-kāṣṭhāṁ
snānārtham anya-sadane bhavatīṁ niviṣṭām |
abhyajya gandhitatarair iha taila-pūraiḥ
prodvartayiṣyati kadā kim u kiṅkarīyam ||20|| (vasanta-tilakam)

अयि विमलजलानां गन्धकर्पूरपुष्पै-
र्जितविधुमुखपद्मे वासितानां घटोघैः।
प्रणयललितसख्या दीयमानैः पुरस्ता-
त्तव वरमभिषेकं हा कदाहं करिष्ये॥२१॥ (मालिनी)

ayi vimala-jalānāṁ gandha-karpūra-puṣpair
jita-vidhu-mukha-padme vāsitānāṁ ghaṭoghaiḥ |
praṇaya-lalita-sakhyā dīyamānaiḥ purastāt
tava varam abhiṣekaṁ hā kadāhaṁ kariṣye ||21|| (mālinī)

पानीयं चीनवस्त्रैः शशिमुखि शनकैर्रम्यमृद्वङ्गयष्टे-
र्यत्नादुत्सार्य मोदाद्दिशि दिशि विचलन्नेत्रमीनाञ्चलायाः।
श्रोणौ रक्तं दुकूलं तदपरमतुलं चारुनीलं शिरोऽग्रा-
त्सर्वाङ्गेषु प्रमोदात्पुलकितवपुषा किं मया ते प्रयोज्यम्॥ २२॥ (स्रग्धरा)

pānīyaṁ cīna-vastraiḥ śaśimukhi śanakair ramya-mṛdv-aṅga-yaṣṭer
yatnād utsārya modād diśi diśi vicalan-netra-mīnāñcalāyāḥ ।
śroṇau raktaṁ dukūlaṁ tad-aparam atulaṁ cāru-nīlaṁ śiro'grāt
sarvāṅgeṣu pramodāt pulakita-vapuṣā kiṁ mayā te prayojyam ।।22।। (sragdharā)

प्रक्षाल्य पादकमलं तदनुक्रमेण
गोष्ठेन्द्रसूनुदयिते तव केशपाशम्।
हा नर्मदाग्रथितसुन्दरसूक्ष्ममाल्यै-
र्वेणीं करिष्यति कदा प्रणयैर्जनोऽयम्॥ २३॥ (वसन्ततिलकं)

prakṣālya pāda-kamalaṁ tad-anukrameṇa
goṣṭhendra-sūnu-dayite tava keśa-pāśam ।
hā narmadāgrathita-sundara-sūkṣma-mālyair
veṇīṁ kariṣyati kadā praṇayair jano'yam ।।23।। (vasanta-tilakam)

सुभगमृगमदेनाखण्डशुभ्रांशुवत्ते
तिलकमिह ललाटे देवि मोदाद्विधाय।
मसृणघुसृणचर्चामर्पयित्वा च गात्रे
स्तनयुगमपि गन्धैश्चित्रितं किं करिष्ये॥ २४॥ (मालिनी)

subhaga-mṛgamadenākhaṇḍa-śubhrāṁśuvat te
tilakam iha lalāṭe devi modād vidhāya ।
masṛṇa-ghusṛṇa-carcām arpayitvā ca gātre
stana-yugam api gandhaiś citritaṁ kiṁ kariṣye ।।24।। (mālinī)

सिन्दूररेखा सीमन्ते देवि रत्नशलाकया।
मया या कल्पिता किं ते सालकाञ्छोभयिष्यति॥२५॥ (अनुष्टुप्)

sindūra-rekhā sīmante devi ratna-śalākayā ।
mayā yā kalpitā kiṁ te sālakāñ chobhayiṣyati ।।25।। (anuṣṭup)

हन्त देवि तिलकस्य समन्ता-
द्बिन्दवोऽरुणसुगन्धिरसेन।
कृष्णमादनमहौषधिमुख्या
धीरहस्तमिह किं परिकल्प्याः॥२६॥ (स्वागता)

hanta devi tilakasya samantād
bindavo'ruṇa-sugandhi-rasena ।
kṛṣṇa-mādana-mahauṣadhi-mukhyā
dhīra-hastam iha kiṁ parikalpyāḥ ।।26।। (svāgatā)

गोष्ठेन्द्रपुत्रमदचित्तकरीन्द्रराज-
बन्धाय पुष्पधनुषः किल बन्धरज्जोः।
किं कर्णयोस्तव वरोरु वरावतंस-
युग्मेन भूषणमहं सुखिता करिष्ये॥२७॥ (वसन्ततिलकं)

goṣṭhendra-putra-mada-citta-karīndra-rāja-
bandhāya puṣpa-dhanuṣaḥ kila bandha-rajjoḥ ।
kiṁ karṇayos tava varoru varāvataṁsa-
yugmena bhūṣaṇam ahaṁ sukhitā kariṣye ।।27।। (vasanta-tilakam)

या ते कञ्चुलिरत्र सुन्दरि मया वक्षोजयोरर्पिता
श्यामाच्छादनकाम्यया किल न साऽसत्येति विज्ञायताम्।
किन्तु स्वामिनि कृष्ण एव सहसा तत्तामवाप्य स्वयं
प्राणेभ्योऽप्यधिकं स्वकं निधियुगं संगोपयत्येव हि॥२८॥ (शार्दूलविक्रीडितं)

yā te kañculir atra sundari mayā vakṣojayor arpitā
śyāmācchādana-kāmyayā kila na sā'satyeti vijñāyatām ।
kintu svāmini kṛṣṇa eva sahasā tat tām avāpya svayaṁ
prāṇebhyo'py adhikaṁ svakaṁ nidhi-yugaṁ saṁgopayaty eva hi ।।28।।
(śārdūlavikrīḍitam)

नानामणिप्रकरगुम्फितचारुपुष्ट्या
मुक्तास्रजस्तव सुवक्षसि हेमगौरि।
श्रान्त्याभृतालसमुकुन्दसुतूलिकायां
किं कल्पयिष्यतितरां तव दासिकेयम्॥२९॥ (वसन्ततिलकं)

nānā-maṇi-prakara-gumphita-cāru-puṣṭyā
muktā-srajas tava suvakṣasi hema-gauri ।
śrāntyābhṛtālasa-mukunda-sutūlikāyāṁ
kiṁ kalpayiṣyatitarāṁ tava dāsikeyam ।।29।। (vasanta-tilakam)

मणिचयखचिताभिर्नीलचूडावलीभि-
र्हरिदयितकलाविद्द्वन्द्वमिन्दीवराक्षि।
अपि बत तव दिव्यैरङ्गुलीरङ्गुलीयैः
क्वचिदपि किल काले भूषयिष्यामि किं नु॥३०॥ (मालिनी)

maṇi-caya-khacitābhir nīla-cūḍāvalībhir
hari-dayita-kalāvid-dvandvam indīvarākṣi ।
api bata tava divyair aṅgulīr aṅgulīyaiḥ
kvacid api kila kāle bhūṣayiṣyāmi kiṁ nu ।।30।। (mālinī)

पादाम्भोजे मणिमयतुलाकोटियुग्मेन यत्ना-
दभ्यर्चे तद्दलकुलमपि प्रेष्ठपादाङ्गुलीयैः।
काञ्चीदाम्ना कटितटमिदं प्रेमपीठं सुनेत्रे
कंसारातेरतुलमचिरादर्चयिष्यामि किं ते॥३१॥ (मन्दाक्रान्ता)

pādāmbhoje maṇimaya-tulākoṭi-yugmena yatnād
abhyarce tad-dala-kulam api preṣṭha-pādāṅgulīyaiḥ |
kāñcī-dāmnā kaṭi-taṭam idaṁ prema-pīṭhaṁ sunetre
kaṁsārāter atulam acirād arcayiṣyāmi kiṁ te ||31|| (mandākrāntā)

ललिततरमृणालीकल्पबाहुद्वयं ते
मुरजयिमतिहंसीधैर्यविध्वंसदक्षम्।
मणिकुलरचिताभ्यामङ्गदाभ्यां पुरस्ता-
त्प्रमदभरविनम्रा कल्पयिष्यामि किं वा॥३२॥ (मालिनी)

lalitatara-mṛṇālī-kalpa-bāhu-dvayaṁ te
murajayi-mati-haṁsī-dhairya-vidhvaṁsa-dakṣam |
maṇikula-racitābhyām aṅgadābhyāṁ purastāt
pramada-bhara-vinamrā kalpayiṣyāmi kiṁ vā ||32|| (mālinī)

रासोत्सवे य इह गोकुलचन्द्रबाहु-
स्पर्शेन सौभगभरं नितरामवाप।
ग्रैवेयकेण किमु तं तव कण्ठदेशं
सम्पूजयिष्यति पुनः सुभगे जनोऽयम्॥३३॥ (वसन्ततिलकं)

rāsotsave ya iha gokula-candra-bāhu-
sparśena saubhaga-bharaṁ nitarām avāpa |
graiveyakeṇa kimu taṁ tava kaṇṭha-deśaṁ
sampūjayiṣyati punaḥ subhage jano'yam ||33|| (vasanta-tilakam)

दत्तः प्रलम्बरिपुणोद्भटशङ्खचूड-
नाशात्प्रतोषिहृदयं मधुमङ्गलस्य।
हस्तेन यः सुमुखि कौस्तुभमित्रमेतं
किं ते स्यमन्तकमणिं तरलं करिष्ये॥३४॥ (वसन्ततिलकं)

dattaḥ pralamba-ripuṇodbhaṭa-śaṅkhacūḍa-
nāśāt pratoṣi-hṛdayaṁ madhumaṅgalasya ।
hastena yaḥ sumukhi kaustubha-mitram etaṁ
kiṁ te syamantaka-maṇiṁ taralaṁ kariṣye ।।34।। (vasanta-tilakam)

प्रान्तद्वये परिविराजितगुच्छयुग्म-
विभ्राजितेन नवकाञ्चनडोरकेण।
क्षीणं त्रुटत्यथ कृशोदरि चेदितीव
बध्नामि भोस्तव कदातिभयेन मध्यम्॥३५॥ (वसन्ततिलकं)

prānta-dvaye parivirājita-guccha-yugma-
vibhrājitena nava-kāñcana-ḍorakeṇa ।
kṣīṇaṁ truṭaty atha kṛśodari ced itīva
badhnāmi bhos tava kadātibhayena madhyam ।।35।। (vasanta-tilakam)

कनकगुणितमुच्चैर्मौक्तिकं मत्करात्ते
तिलकुसुमविजेत्री नासिका सा सुवृत्तम्।
मधुमथनमहालिक्षोभकं हेमगौरि
प्रकटतरमरन्दप्रायमादास्यते किम्॥३६॥ (मालिनी)

kanaka-guṇitam uccair mauktikaṁ mat-karāt te
tila-kusuma-vijetrī nāsikā sā suvṛttam ।
madhumathana-mahāli-kṣobhakaṁ hema-gauri
prakaṭatara-maranda-prāyam ādāsyate kim ।।36।। (mālinī)

अङ्गदेन तव वामदोःस्थले
स्वर्णगौरि नवरत्नमालिकाम्।
पट्टगुच्छपरिशोभितामिमा-
माज्ञया परिणयामि ते कदा॥३७॥ (रथोद्धता)

aṅgadena tava vāma-doḥ-sthale
svarṇa-gauri nava-ratna-mālikām ।
paṭṭa-guccha-pariśobhitām imām
ājñayā pariṇayāmi te kadā ।।37।। (rathoddhatā)

कर्णयोरुपरि चक्रशलाके
चञ्चलाक्षि निहिते मयका ते।
क्षोभकं निखिलगोपवधूनां
चक्रवद्भ्रमयतां मुरशत्रुम्॥३८॥ (स्वागता)

karṇayor upari cakra-śalāke
cañcalākṣi nihite mayakā te ।
kṣobhakaṁ nikhila-gopa-vadhūnāṁ
cakravad bhramayatāṁ mura-śatrum ।।38।। (svāgatā)

कदा ते मृगशावाक्षि चिबुके मृगनाभिना।
बिन्दुमुल्लासयिष्यामि मुकुन्दामोदमन्दिरे॥३९॥ (अनुष्टुप्)

kadā te mṛga-śāvākṣi cibuke mṛga-nābhinā ।
bindum ullāsayiṣyāmi mukundāmoda-mandire ।।39।। (anuṣṭup)

दशनांस्ते कदा रक्तरेखाभिर्भूषयाम्यहम्।
देवि मुक्ताफलानीह पद्मरागगुणैरिव॥४०॥ (अनुष्टुप्)

daśanāṁs te kadā rakta-rekhābhir bhūṣayāmy aham ।
devi muktā-phalānīha padma-rāga-guṇair iva ।।40।। (anuṣṭup)

उत्खादिरेण नवचन्द्रविराजितेन
रागेण ते वरसुधाधरबिम्बयुग्मे।
गाङ्गेयगात्रि मयका परिरञ्जितेऽस्मि-
न्दंशं विधास्यति हठात्किमु कृष्णकीरः॥४१॥ (वसन्ततिलकं)

utkhādireṇa nava-candra-virājitena
rāgeṇa te vara-sudhādhara-bimba-yugme ।
gāṅgeya-gātri mayakā parirañjite'smin
daṁśaṁ vidhāsyati haṭhāt kim u kṛṣṇa-kīraḥ ।।41।। (vasanta-tilakam)

यत्प्रान्तदेशलवलेशविघूर्णितेन
बद्धः क्षणाद्भवति कृष्णकरीन्द्र उच्चैः।
तत्खञ्जरीटजयिनेत्रयुगं कदायं
सम्पूजयिष्यति जनस्तव कज्जलेन॥४२॥ (वसन्ततिलकं)

yat-prānta-deśa-lava-leśa-vighūrṇitena
baddhaḥ kṣaṇād bhavati kṛṣṇa-karīndra uccaiḥ ।
tat-khañjarīṭa-jayi-netra-yugaṁ kadāyaṁ
sampūjayiṣyati janas tava kajjalena ।।42।। (vasanta-tilakam)

यस्याङ्करञ्जितशिरास्तव मानभङ्गे
गोष्ठेन्द्रसूनुरधिकां सुषमामुपैति।
लाक्षारसः स च कदा पदयोरधस्ते
न्यस्तो मयाप्यतितरां छविमाप्स्यतीह॥४३॥ (वसन्ततिलकं)

yasyāṅka-rañjita-śirās tava māna-bhaṅge
goṣṭhendra-sūnur adhikāṁ suṣamām upaiti ।
lākṣā-rasaḥ sa ca kadā padayor adhaste
nyasto mayāpy atitarāṁ chavim āpsyatīha ।।43।। (vasanta-tilakam)

कलावति नतांसयोः प्रचुरकामपुञ्जोज्ज्वल-
त्कलानिधिमुरद्विषः प्रकटरासभावयोः।
भ्रमद्भ्रमरझङ्कृतैर्मधुरमल्लिमालां मुदा
कदा तव तयोः समर्पयति देवि दासीजनः॥४४॥ (पृथ्वी)

kalāvati natāṁsayoḥ pracura-kāma-puñjojjvalat-
kalā-nidhi-muradviṣaḥ prakaṭa-rāsa-sambhāvayoḥ ।
bhramad-bhramara-jhaṅkṛtair madhura-malli-mālāṁ mudā
kadā tava tayoḥ samarpayati devi dāsī-janaḥ ।।44।। (pṛthvī)

सूर्याय सूर्यमणिनिर्मितवेदिमध्ये
मुग्धाङ्गि भावत इहालिकुलैर्वृतायाः।
अर्घं समर्पयितुमुत्कधियस्तवारा-
त्सज्जानि किं सुमुखि दास्यति दासिकेयम्॥४५॥ (वसन्ततिलकं)

sūryāya sūrya-maṇi-nirmita-vedi-madhye
mugdhāṅgi bhāvata ihāli-kulair vṛtāyāḥ ।
arghaṁ samarpayitum utka-dhiyas tavārāt
sajjāni kiṁ sumukhi dāsyati dāsikeyam ।।45।। (vasanta-tilakam)

व्रजपुरपतिराज्ञ्या आज्ञया मिष्टमन्नं
बहुविधमतियत्नात्स्वेन पक्कं वरोरु।
सपदि निजसखीनां मद्विधानाञ्च हस्तै-
र्मधुमथननिमित्तं किं त्वया सन्निधाप्यम्॥४६॥ (मालिनी)

vraja-pura-pati-rājñyā ājñayā miṣṭam annaṁ
bahu-vidham atiyatnāt svena pakvaṁ varoru ।
sapadi nija-sakhīnāṁ mad-vidhānāñca hastair
madhumathana-nimittaṁ kiṁ tvayā sannidhāpyam ।।46।। (mālinī)

नीतान्नमद्विधललाटतटे ललाटं
प्रीत्या प्रदाय मुदिता व्रजराजराज्ञी।
प्रेम्णा प्रसूरिव भवत्कुशलस्य पृच्छां
भव्ये विधास्यति कदा मयि तावकत्वात्॥४७॥ (वसन्ततिलकं)

nītānna-mad-vidha-lalāṭa-taṭe lalāṭaṁ
prītyā pradāya muditā vraja-rāja-rājñī ।
premṇā prasūr iva bhavat-kuśalasya pṛcchāṁ
bhavye vidhāsyati kadā mayi tāvakatvāt ।।47।। (vasanta-tilakam)

कृष्णवक्राम्बुजोच्छिष्टं प्रसादं परमादरात्।
दत्तं धनिष्ठया देवि किमानेष्यामि तेऽग्रतः॥४८॥ (अनुष्टुप्)

kṛṣṇa-vaktrāmbujocchiṣṭaṁ prasādaṁ param ādarāt ।
dattaṁ dhaniṣṭhayā devi kim āneṣyāmi te'grataḥ ।।48।। (anuṣṭup)

नानाविधैरमृतसाररसायनैस्तैः
कृष्णप्रसादमिलितैरिह भोज्यपेयैः।
हा कुङ्कुमाङ्गि ललितादिसखीवृता त्वं
यत्नान्मया किमुतरामुपभोजनीया॥४९॥ (वसन्ततिलकं)

nānā-vidhair amṛta-sāra-rasāyanais taiḥ
kṛṣṇa-prasāda-militair iha bhojya-peyaiḥ ।
hā kuṅkumāṅgi lalitādi-sakhī-vṛtā tvaṁ
yatnān mayā kim utarām upabhojanīyā ।।49।। (vasanta-tilakam)

पानाय वारि मधुरं नवपाटलादि-
कर्पूरवासिततरं तरलाक्षि दत्त्वा।
काले कदा तव मयाऽऽचमनीयदन्त-
काष्ठादिकं प्रणयतः परमर्पणीयम्॥५०॥ (वसन्ततिलकं)

pānāya vāri madhuraṁ nava-pāṭalādi-
karpūra-vāsitataraṁ taralākṣi dattvā |
kāle kadā tava mayā'camanīya-danta-
kāṣṭhādikaṁ praṇayataḥ param arpaṇīyam ||50|| (vasanta-tilakam)

भोजनस्य समये तव यत्ना-
द्देवि धूपनिवहान्वरगन्धान्।
बीजनाद्यमपि तत्क्षणयोग्यं
हा कदा प्रणयतः प्रणयामि॥५१॥ (स्वागता)

bhojanasya samaye tava yatnād-
devi dhūpa-nivahān vara-gandhān |
bījanādyam api tat-kṣaṇa-yogyaṁ
hā kadā praṇayataḥ praṇayāmi ||51|| (svāgatā)

कर्पूरपूरपरिपूरितनागवल्ली-
पर्णादिपूगपरिकल्पितवीटिकां ते।
वक्राम्बुजे मधुरगात्रि मुदा कदाहं
प्रोत्फुल्लरोमनिकरैः परमर्पयामि॥५२॥ (वसन्ततिलकं)

karpūra-pūra-paripūrita-nāga-vallī-
parṇādi-pūga-parikalpita-vīṭikāṁ te |
vaktrāmbuje madhura-gātri mudā kadāhaṁ
protphulla-roma-nikaraiḥ param arpayāmi ||52|| (vasanta-tilakam)

आरात्रिकेण भवतीं किमु देवि देवीं
निर्मञ्छयिष्यतितरां ललिता प्रमोदात्।
अन्यालयश्च नवमङ्गलगानपुष्पैः
प्राणार्बुदैरपि कचैरपि दासिकेयम्॥५३॥ (वसन्ततिलकं)

ārātrikeṇa bhavatīṁ kim u devi devīṁ
nirmañchayiṣyatitarāṁ lalitā pramodāt ।
anyālayaś ca nava-maṅgala-gāna-puṣpaiḥ
prāṇārbudair api kacair api dāsikeyam ।।53।। (vasanta-tilakam)

आलीकुलेन ललिताप्रमुखेन सार्ध-
मातन्वती त्वमिह निर्भरनर्मगोष्ठीम्।
मत्पाणिकल्पितमनोहरकेलितल्प-
माभूषयिष्यसि कदा स्वपनेन देवि॥५४॥ (वसन्ततिलकं)

ālī-kulena lalitā-pramukhena sārdham
ātanvatī tvam iha nirbhara-narma-goṣṭhīm ।
mat-pāṇi-kalpita-manohara-keli-talpam
ābhūṣayiṣyasi kadā svapanena devi ।।54।। (vasanta-tilakam)

संवाहयिष्यति पदौ तव किङ्करीयं
हा रूपमञ्जरिरसौ च कराम्बुजे द्वे।
यस्मिन्मनोज्ञहृदये सदयेऽनयोः किं
श्रीमान्भविष्यतितरां शुभवासरः सः॥५५॥ (वसन्ततिलकं)

saṁvāhayiṣyati padau tava kiṅkarīyaṁ
hā rūpa-mañjarir asau ca karāmbuje dve ।
yasmin manojña-hṛdaye sadaye'nayoḥ kiṁ
śrīmān bhaviṣyatitarāṁ śubha-vāsaraḥ saḥ ।।55।। (vasanta-tilakam)

तवोद्गीर्णं भोज्यं सुमुखि किल कल्लोलसलिलं
तथा पादाम्भोजामृतमिह मया भक्तिलतया।
अयि प्रेम्णा सार्धं प्रणयिजनवर्गैर्बहुविधै-
रहो लब्धव्यं किं प्रचुरतरभाग्योदयबलैः ॥५६॥ (शिखरिणी)

tavodgīrṇaṁ bhojyaṁ sumukhi kila kallola-salilaṁ
tathā pādāmbhojāmṛtam iha mayā bhakti-latayā ।
ayi premṇā sārdhaṁ praṇayi-jana-vargair bahuvidhair
aho labdhavyaṁ kiṁ pracuratara-bhagyodaya-balaiḥ ।।56।। (śikhariṇī)

भोजनावसरे देवि स्नेहेन स्वमुखाम्बुजात्।
मह्यं त्वद्गतचित्तायै किं सुधास्त्वं प्रदास्यसि॥५७॥ (अनुष्टुप्)

bhojanāvasare devi snehena sva-mukhāmbujāt ।
mahyaṁ tvad-gata-cittāyai kiṁ sudhās tvaṁ pradāsyasi ।।57।। (anuṣṭup)

अपि बत रसवत्याः सिद्धये माधवस्य
व्रजपतिपुरमुद्यद्रोमरोमा व्रजन्ती।
स्खलितगतिरुदञ्चत्स्वान्तसौख्येन किं मे
क्वचिदपि नयनाभ्यां लप्स्यसे स्वामिनि त्वम्॥५८॥ (मालिनी)

api bata rasavatyāḥ siddhaye mādhavasya
vraja-pati-puram udyad-roma-romā vrajantī ।
skhalita-gatir udañcat-svānta-saukhyena kiṁ me
kvacid api nayanābhyāṁ lapsyase svāmini tvam ।।58।। (mālinī)

पार्श्वद्वये ललितयाथ विशाखया च
त्वां सर्वतः परिजनैश्च परैः परीताम्।
पश्चान्मया विभृतभङ्गुरमध्यभागां
किं रूपमञ्जरिरियं पथि नेष्यतीह॥५९॥ (वसन्ततिलकं)

pārśva-dvaye lalitayātha viśākhayā ca
tvāṁ sarvataḥ parijanaiś ca paraiḥ parītām ।
paścān mayā vibhṛta-bhaṅgura-madhya-bhāgāṁ
kiṁ rūpa-mañjarir iyaṁ pathi neṣyatīha ।।59।। (vasanta-tilakam)

हम्बारवैरिह गवामपि वल्लवानां
कोलाहलैर्विविधवन्दिकलावतां तैः।
सम्भ्राजते प्रियतया व्रजराजसूनो-
र्गोवर्धनादपि गुरुर्व्रजवन्दिताद्यः॥६०॥ (वसन्ततिलकं)

प्राप्तां निजप्रणयिनीप्रकरैः परीतां
नन्दीश्वरं व्रजमहेन्द्रमहालयं तम्।
दूरे निरीक्ष्य मुदिता त्वरितं धनिष्ठा
त्वामानयिष्यति कदा प्रणयैर्ममाग्रे॥६१॥युग्मकम्॥ (वसन्ततिलकं)

hambā-ravair iha gavām api vallavānāṁ
kolāhalair vividha-vandi-kalāvatāṁ taiḥ ।
sambhrājate priyatayā vraja-rāja-sūnor
govardhanād api gurur vraja-vanditād yaḥ ।।60।। (vasanta-tilakam)

prāptāṁ nija-praṇayinī-prakaraiḥ parītāṁ
nandīśvaraṁ vraja-mahendra-mahālayaṁ tam ।
dūre nirīkṣya muditā tvaritaṁ dhaniṣṭhā
tvām ānayiṣyati kadā praṇayair mamāgre ।।61।। yugmakam।। (vasanta-tilakam)

प्रक्षाल्य पादकमले कुशले प्रविष्टा
नत्वा व्रजेशमहिषीप्रभृतीर्गुरूस्ताः।
हा कुर्वती रसवतीं रसभाक्कदा त्वं
संमज्जयिष्यसितरां सुखसागरे माम्॥६२॥ (वसन्ततिलकं)

prakṣālya pāda-kamale kuśale praviṣṭā
natvā vrajeśa-mahiṣī-prabhṛtīr gurūs tāḥ ।
hā kurvatī rasavatīṁ rasa-bhāk kadā tvaṁ
saṁmajjayiṣyasitarāṁ sukha-sāgare mām ।।62।। (vasanta-tilakam)

माधवाय नतवक्त्रमादृता
भोज्यपेयरससञ्चयं क्रमात्।
तन्वती त्वमिह रोहिणीकरे
देवि फुल्लवदनं कदेक्ष्यसे॥६३॥ (रथोद्धता)

mādhavāya nata-vaktram ādṛtā
bhojya-peya-rasa-sañcayaṁ kramāt ।
tanvatī tvam iha rohiṇī-kare
devi phulla-vadanaṁ kadekṣyase ।।63।। (rathoddhatā)

भोजने गुरुसभासु कथञ्चि-
न्माधवेन नतदृष्टि मदोत्कम्।
वीक्ष्यमाणमिह ते मुखपद्मं
मोदयिष्यति कदा मधुरे माम्॥६४॥ (स्वागता)

bhojane guru-sabhāsu kathañcin
mādhavena nata-dṛṣṭi madotkam ।
vīkṣyamāṇam iha te mukha-padmaṁ
modayiṣyati kadā madhure mām ।।64।। (svāgatā)

अयि विपिनमटन्तं सौरभेयीकुलानां
व्रजनृपतिकुमारं रक्षणे दीक्षितं तम्।
विकलमतिजनन्या लाल्यमानं कदा त्वं
स्मितमधुरकपोलं वीक्ष्यसे वीक्ष्यमाणा॥६५॥ (मालिनी)

ayi vipinam aṭantaṁ saurabheyī-kulānāṁ
vraja-nṛpati-kumāraṁ rakṣaṇe dīkṣitaṁ tam ।
vikala-mati-jananyā lālyamānaṁ kadā tvaṁ
smita-madhura-kapolaṁ vīkṣyase vīkṣyamāṇā ।।65।। (mālinī)

गोष्ठेशयाथ कुतुकाच्छपथादिपूर्वं
सुस्निग्धया सुमुखि मातृपरार्धतोऽपि।
हा ह्रीमति प्रियगणैः सह भोज्यमानां
किं त्वां निरीक्ष्य हृदये मुदमद्य लप्स्ये॥६६॥ (वसन्ततिलकं)

goṣṭheśayātha kutukāc-chapathādi-pūrvaṁ
susnigdhayā sumukhi mātṛ-parārdhato'pi ।
hā hrīmati priya-gaṇaiḥ saha bhojyamānāṁ
kiṁ tvāṁ nirīkṣya hṛdaye mudam adya lapsye ।।66।। (vasanta-tilakam)

आलिङ्गनेन शिरसः परिचुम्बनेन
स्नेहावलोकनभरेण च खञ्जनाक्षि।
गोष्ठेशया नववधूमिव लाल्यमानां
त्वां प्रेक्ष्य किं हृदि महोत्सवमातनिष्ये॥६७॥ (वसन्ततिलकं)

āliṅganena śirasaḥ paricumbanena
snehāvalokana-bhareṇa ca khañjanākṣi ।
goṣṭheśayā nava-vadhūm iva lālyamānāṁ
tvāṁ prekṣya kiṁ hṛdi mahotsavam ātaniṣye ।।67।। (vasanta-tilakam)

हा रूपमञ्जरि सखि प्रणयेन देवीं
त्वद्बाहुदत्तभुजवल्लरिमायताक्षीम्।
पश्चादहं कलितकामतरङ्गरङ्गां
नेष्यामि किं हरिविभूषितकेलिकुञ्जम्॥ ६८॥ (वसन्ततिलकं)

hā rūpa-mañjari sakhi praṇayena devīṁ
tvad-bāhu-datta-bhuja-vallarim āyatākṣīm ।
paścād ahaṁ kalita-kāma-taraṅga-raṅgāṁ
neṣyāmi kiṁ hari-vibhūṣita-keli-kuñjam ।।68।। (vasanta-tilakam)

साकं त्वया सखि निकुञ्जगृहे सरस्याः
स्वस्यास्तटे कुसुमभावितभूषणेन।
श्रृङ्गारितं विदधती प्रियमीश्वरी सा
हा हा भविष्यति मदीक्षणगोचरः किम्॥ ६९॥ (वसन्ततिलकं)

sākaṁ tvayā sakhi nikuñja-gṛhe sarasyāḥ
svasyās taṭe kusuma-bhāvita-bhūṣaṇena ।
śṛṅgāritaṁ vidadhatī priyam īśvarī sā
hā hā bhaviṣyati mad-īkṣaṇa-gocaraḥ kim ।।69।। (vasanta-tilakam)

श्रुत्वा विचक्षणमुखाद्व्रजराजसूनोः
शस्ताभिसारसमयं सुभगेऽत्र हृष्टा।
सूक्ष्माम्बरैः कुसुमसंस्कृतकर्णपूर-
हारादिभिश्च भवतीं किमलङ्करिष्ये॥ ७०॥ (वसन्ततिलकं)

śrutvā vicakṣaṇa-mukhād vraja-rāja-sūnoḥ
śastābhisāra-samayaṁ subhage'tra hṛṣṭā ।
sūkṣmāmbaraiḥ kusuma-saṁskṛta-karṇa-pūra-
hārādibhiś ca bhavatīṁ kim alaṅkariṣye ।।70।। (vasanta-tilakam)

नानापुष्पैः क्वणितमधुपैर्देवि सम्भाविताभि-
र्मालाभिस्तद्घुसृणविलसत्कामचित्रालिभिश्च।
राजद्द्वारे सपदि मदनानन्ददाभिख्यगेहे
मल्लीजातैः शशिमुखि कदा तल्पमाकल्पयामि॥७१॥ (मन्दाक्रान्ता)

nānā-puṣpaiḥ kvaṇita-madhupair devi sambhāvitābhir
mālābhis tad-ghusṛṇa-vilasat-kāma-citrālibhiś ca ।
rājad-dvāre sapadi madanānandadābhikhya-gehe
mallī-jātaiḥ śaśimukhi kadā talpam ākalpayāmi ।।71।। (mandākrāntā)

श्रीरूपमञ्जरिकरार्चितपादपद्म-
गोष्ठेन्द्रनन्दनभुजार्पितमस्तकायाः।
हा मोदतः कनकगौरि पदारविन्द-
संवाहनानि शनकैस्तव किं करिष्ये॥७२॥ (वसन्ततिलकं)

śrī-rūpa-mañjari-karārcita-pāda-padma-
goṣṭhendra-nandana-bhujārpita-mastakāyāḥ ।
hā modataḥ kanaka-gauri padāravinda-
saṁvāhanāni śanakais tava kiṁ kariṣye ।।72।। (vasanta-tilakam)

गोवर्धनाद्रिनिकटे मुकुटेन नर्म-
लीलाविदग्धशिरसां मधुसूदनेन।
दानच्छलेन भवतीमवरुद्धमानां
द्रक्ष्यामि किं भ्रुकुटिदर्पितनेत्रयुग्माम्॥७३॥ (वसन्ततिलकं)

govardhanādri-nikaṭe mukuṭena narma-
līlā-vidagdha-śirasāṁ madhusūdanena ।
dāna-cchalena bhavatīm avaruddhamānāṁ
drakṣyāmi kiṁ bhru-kuṭi-darpita-netra-yugmām ।।73।। (vasanta-tilakam)

तव तनुवरगन्धासङ्गिवातेन चन्द्रा-
वलिकरकृतमल्लीकेलितल्पाच्छलेन।
मधुरमुखि मुकुन्दं कुण्डतीरे मिलन्तं
मधुपमिव कदाहं वीक्ष्य दर्पं करिष्ये॥७४॥ (मालिनी)

tava tanu-vara-gandhāsaṅgi-vātena candrā-
vali-kara-kṛta-mallī-keli-talpāc chalena ।
madhura-mukhi mukundaṁ kuṇḍatīre milantaṁ
madhupam iva kadāhaṁ vīkṣya darpaṁ kariṣye ।।74।। (mālinī)

समन्तादुन्मत्तभ्रमरकुलझङ्कारनिकरै-
र्लसत्पद्मस्तोमैरपि विहगरावैरपि परम्।
सखीवृन्दैः स्वीयैः सरसि मधुरे प्राणपतिना
कदा द्रक्ष्यामस्ते शशिमुखि नवं केलिनिवहम्॥७५॥ (शिखरिणी)

samantād unmatta-bhramara-kula-jhaṅkāra-nikarair
lasat-padma-stomair api vihaga-rāvair api param ।
sakhī-vṛndaiḥ svīyaiḥ sarasi madhure prāṇa-patinā
kadā drakṣyāmas te śaśimukhi navaṁ keli-nivaham ।।75।। (śikhariṇī)

सरोवरलसत्तटे मधुपगुञ्जिकुञ्जान्तरे
स्फुटत्कुसुमसङ्कुले विविधपुष्पसङ्घैर्मुदा।
अरिष्टजयिना कदा तव वरोरु भूषाविधि-
र्विधास्यत इह प्रियं मम सुखाब्धिमातन्वता॥७६॥ (पृथ्वी)

sarovara-lasat-taṭe madhupa-guñji-kuñjāntare
sphuṭat-kusuma-saṅkule vividha-puṣpa-saṅghair mudā ।
ariṣṭa-jayinā kadā tava varoru bhūṣā-vidhir
vidhāsyata iha priyaṁ mama sukhābdhim ātanvatā ।।76।। (pṛthvī)

स्फीतस्वान्तं कयाचित्सरभसमचिरेणार्प्यमाणैर्दरोद्य-
न्नानापुष्पोरुगुञ्जाफलनिकरलसत्केकिपिञ्छप्रपञ्चैः।
सोत्कम्पं रच्यमानः कृतरुचिहरिणोत्फुल्लमङ्गं वहन्त्याः
स्वामिन्याः केशपाशः किमु मम नयनानन्दमुच्चैर्विधाता॥७७॥ (स्रग्धरा)

sphīta-svāntaṁ kayācit sarabhasam acireṇārpyamāṇair darodyan-
nānā-puṣporu-guñjā-phala-nikara-lasat-keki-piñcha-prapañcaiḥ |
sotkampaṁ racyamānaḥ kṛta-ruci-hariṇotphullam aṅgaṁ vahantyāḥ
svāminyāḥ keśa-pāśaḥ kim u mama nayanānandam uccair vidhātā ||77|| (sragdharā)

माधवं मदनकेलिविभ्रमे
मत्तया सरसिजेन भवत्या।
ताडितं सुमुखि वीक्ष्य किन्त्वियं
गूढहास्यवदना भविष्यति॥७८॥ (उपजातिः)

mādhavaṁ madana-keli-vibhrame
mattayā sarasijena bhavatyā |
tāḍitaṁ sumukhi vīkṣya kintv iyaṁ
gūḍha-hāsya-vadanā bhaviṣyati ||78|| (upajātiḥ)

सुललितनिजबाह्वाश्लिष्टगोष्ठेन्द्रसूनोः
सुवलिततरबाह्वाश्लेषदीव्यन्नतांसा।
मधुरमदनगानं तन्वती तेन सार्धं
सुभगमुखि मुदं मे हा कदा दास्यसि त्वम्॥७९॥ (मालिनी)

sulalita-nija-bāhvāśliṣṭa-goṣṭhendra-sūnoḥ
suvalitatara-bāhvāśleṣa-dīvyan-natāṁsā |
madhura-madana-gānaṁ tanvatī tena sārdhaṁ
subhaga-mukhi mudaṁ me hā kadā dāsyasi tvam ||79|| (mālinī)

जित्वा पाशकखेलायामाच्छिद्य मुरलीं हरेः।
क्षिप्तां मयि त्वया देवि गोपयिष्यामि तां कदा॥८०॥ (अनुष्टुप्)

jitvā pāśaka-khelāyām ācchidya muralīṁ hareḥ ।
kṣiptāṁ mayi tvayā devi gopayiṣyāmi tāṁ kadā ।।80।। (anuṣṭup)

अयि सुमुखि कदाहं मालतीकेलितल्पे
मधुरमधुरगोष्ठीं बिभ्रतीं वल्लभेन।
मनसिजसुखदेऽस्मिन्मन्दिरे स्मेरगण्डां
सपुलकतनुरेषा त्वां कदा बीजयामि॥ ८१॥ (मालिनी)

ayi sumukhi kadāhaṁ mālatī-keli-talpe
madhura-madhura-goṣṭhīṁ vibhratīṁ vallabhena ।
manasija-sukhade 'smin mandire smera-gaṇḍāṁ
sapulaka-tanur eṣā tvāṁ kadā bījayāmi ।। 81।। (mālinī)

आयातोद्यत्कमलवदने हन्त लीलाभिसारा-
द्गत्याटोपैः श्रमविलुलितं देवि पादाब्जयुग्मम्।
स्नेहात्संवाहयितुमपि ह्रीपुञ्जमूर्तेऽप्यलज्जं
नामग्राहं निजजनमिमं हा कदा नोत्स्यसि त्वम्॥८२॥ (मन्दाक्रान्ता)

āyātodyat-kamala-vadane hanta līlābhisārād
gatyāṭopaiḥ śrama-vilulitaṁ devi pādābja-yugmam ।
snehāt saṁvāhayitum api hrī-puñja-mūrte'py alajjaṁ
nāma-grāhaṁ nija-janam imaṁ hā kadā notsyasi tvam ।।82।। (mandākrāntā)

हा नप्त्रि राधे तव सूर्यभक्तेः
कालः समुत्पन्न इतः कुतोऽसि।
इतीव रोषान्मुखरा लपन्ती
सुधेव किं मां सुखयिष्यतीह॥८३॥ (उपजातिः)

hā naptri rādhe tava sūrya-bhakteḥ
kālaḥ samutpanna itaḥ kuto'si ।
itīva roṣān mukharā lapantī
sudheva kiṁ māṁ sukhayiṣyatīha ।।83।। (upajātiḥ)

देवि भाषितपीयूषं स्मितकर्पूरवासितम्।
श्रोत्राभ्यां नयनाभ्यां ते किं नु सेविष्यते मया॥८४॥ (अनुष्टुप्)

devi bhāṣita-pīyūṣaṁ smita-karpūra-vāsitam ।
śrotrābhyāṁ nayanābhyāṁ te kiṁ nu seviṣyate mayā ।।84।। (anuṣṭup)

कुसुमचयनखेलां कुर्वती त्वं परीता
रसकुटिलसखीभिः प्राणनाथेन सार्धम्।
कपटकलहकेल्या क्वापि रोषेण भिन्ना
मम मुदमतिवेलं धास्यसे सुव्रते किम्॥८५॥ (मालिनी)

kusuma-cayana-khelāṁ kurvatī tvaṁ parītā
rasa-kuṭila-sakhībhiḥ prāṇa-nāthena sārdham ।
kapaṭa-kalaha-kelyā kvāpi roṣeṇa bhinnā
mama mudam ativelaṁ dhāsyase suvrate kim ।।85।। (mālinī)

नानाविधैः पृथुलकाकुभरैरसह्यैः
सम्प्रार्थितः प्रियतया तव माधवेन।
त्वन्मानभङ्गविधये सदये जनोऽयं
व्यग्रः पतिष्यति कदा ललितापदान्ते॥८६॥ (वसन्ततिलकं)

nānā-vidhaiḥ pṛthula-kāku-bharair asahyaiḥ
samprārthitaḥ priyatayā tava mādhavena |
tvan-māna-bhaṅga-vidhaye sadaye jano'yaṁ
vyagraḥ patiṣyati kadā lalitā-padānte ||86|| (vasanta-tilakam)

प्रीत्या मङ्गलगीतनृत्यविलसद्वीणादिवाद्योत्सवैः
शुद्धानां पयसां घटैर्बहुविधैः संवासितानां भृशम्।
वृन्दारण्यमहाधिपत्यविधये यः पौर्णमास्या स्वयं
धीरे संविहितः स किं तव महासेको मया द्रक्ष्यते॥८७॥ (शार्दूलविक्रीडितं)

prītyā maṅgala-gīta-nṛtya-vilasad-vīṇādi-vādyotsavaiḥ
śuddhānāṁ payasāṁ ghaṭair bahu-vidhaiḥ saṁvāsitānāṁ bhṛśam |
vṛndāraṇya-mahādhipatya-vidhaye yaḥ paurṇamāsyā svayaṁ
dhīre saṁvihitaḥ sa kiṁ tava mahā-seko mayā drakṣyate ||87|| (śārdūlavikrīḍitam)

भ्रात्रा गोयुतमत्र मञ्जुवदने स्नेहेन दत्त्वालयं
श्रीदाम्ना कृपणां प्रतोष्य जटिलां रक्षाख्यराकाक्षणे।
नीतायाः सुखशोकरोदनभरैस्ते संद्रवन्त्याः परं
वात्सल्याज्जनकौ विधास्यत इतः किं लालनां मेऽग्रतः॥८८॥ (शार्दूलविक्रीडितं)

bhrātrā goyutam atra mañju-vadane snehena dattvālayaṁ
śrīdāmnā kṛpaṇāṁ pratoṣya jaṭilāṁ rakṣākhya-rākā-kṣaṇe |
nītāyāḥ sukha-śoka-rodana-bharais te saṁdravantyāḥ paraṁ
vātsalyāj janakau vidhāsyata itaḥ kiṁ lālanāṁ me'grataḥ ||88|| (śārdūlavikrīḍitam)

लज्जयालिपुरतः परतो मां
गह्वरं गिरिपतेर्बत नीत्वा।
दिव्यगानमपि तत्स्वरभेदं
शिक्ष्ययिष्यसि कदा सदये त्वम्॥८९॥ (स्वागता)

lajjayāli-purataḥ parato māṁ
gahvaraṁ giri-pater bata nītvā ।
divya-gānam api tat-svara-bhedaṁ
śikṣyayiṣyasi kadā sadaye tvam ।।89।। (svāgatā)

याचिता ललितया किल देव्या
लज्जया नतमुखीं गणतो माम्।
देवि दिव्यरसकाव्यकदम्बं
पाठयिष्यसि कदा प्रणयेन॥९०॥ (स्वागता)

yācitā lalitayā kila devyā
lajjayā nata-mukhīṁ gaṇato mām ।
devi divya-rasa-kāvya-kadambaṁ
pāṭhayiṣyasi kadā praṇayena ।।90।। (svāgatā)

निजकुण्डतटिकुञ्जे गुञ्जद्भ्रमरसङ्कुले।
देवि त्वं कच्छपीशिक्षां कदा मां कारयिष्यसि॥९१॥ (अनुष्टुप्)

nija-kuṇḍa-taṭi-kuñje guñjad-bhramara-saṅkule ।
devi tvaṁ kacchapī-śikṣāṁ kadā māṁ kārayiṣyasi ।।91।। (anuṣṭup)

विहारैस्त्रुटितं हारं गुम्फितुं दयितं कदा।
सखीनां लज्जया देवि संज्ञया मां निदेक्ष्यसि॥९२॥ (अनुष्टुप्)

vihārais truṭitaṁ hāraṁ gumphituṁ dayitaṁ kadā ।
sakhīnāṁ lajjayā devi saṁjñayā māṁ nidekṣyasi ।।92।। (anuṣṭup)

स्वमुखान्मन्मुखे देवि कदा ताम्बूलचर्वितम्।
स्नेहात्सर्वदिशो वीक्ष्य समये त्वं प्रदास्यसि॥९३॥ (अनुष्टुप्)

sva-mukhān man-mukhe devi kadā tāmbūla-carvitam |
snehāt sarva-diśo vīkṣya samaye tvaṁ pradāsyasi ||93|| (anuṣṭup)

निविडमदनयुद्धे प्राणनाथेन सार्धं
दयितमधुरकाञ्ची या मदाद्विस्मृतासीत्।
शशिमुखि समये तां हन्त सम्भाल्य भङ्ग्या
त्वरितमिह तदर्थं किं त्वयाहं प्रहेया॥९४॥ (मालिनी)

niviḍa-madana-yuddhe prāṇa-nāthena sārdhaṁ
dayita-madhura-kāñcī yā madād vismṛtāsīt |
śaśimukhi samaye tāṁ hanta sambhālya bhaṅgyā
tvaritam iha tad-arthaṁ kiṁ tvayāhaṁ praheyā ||94|| (mālinī)

केनापि दोषलवमात्रलवेन देवि
सन्ताड्यमान इह धीरमते त्वयोच्चैः।
रोषेण तल्ललितया किल नीयमानः
सन्द्रक्ष्यते किमु मनाक्सदयं जनोऽयम्॥९५॥ (वसन्ततिलकं)

kenāpi doṣa-lava-mātra-lavena devi
santāḍyamāna iha dhīra-mate tvayoccaiḥ |
roṣeṇa tal lalitayā kila nīyamānaḥ
sandrakṣyate kim u manāk sadayaṁ jano'yam ||95|| (vasanta-tilakam)

तवैवास्मि तवैवास्मि न जीवामि त्वया विना।
इति विज्ञाय देवि त्वं नय मां चरणान्तिकम्॥९६॥ (अनुष्टुप्)

tavaivāsmi tavaivāsmi na jīvāmi tvayā vinā |
iti vijñāya devi tvaṁ naya māṁ caraṇāntikam||96|| (anuṣṭup)

स्वकुण्डं तव लोलाक्षि सप्रियायाः सदास्पदम्।
अत्रैव मम संवास इहैव मम संस्थितिः॥९७॥ (अनुष्टुप्)

sva-kuṇḍaṁ tava lolākṣi sa-priyāyāḥ sadāspadam ।
atraiva mama saṁvāsa ihaiva mama saṁsthitiḥ ।।97।। (anuṣṭup)

हे श्रीसरोवर सदा त्वयि सा मदीशा
प्रेष्ठेन सार्धमिह खेलति कामरङ्गैः।
त्वं चेत्प्रियात्प्रियमतीव तयोरितीमां
हा दर्शयाद्य कृपया मम जीवितं ताम्॥९८॥ (वसन्ततिलकं)

he śrī-sarovara sadā tvayi sā mad-īśā
preṣṭhena sārdham iha khelati kāma-raṅgaiḥ ।
tvaṁ cet priyāt priyam atīva tayor itīmāṁ
hā darśayādya kṛpayā mama jīvitaṁ tām ।।98।। (vasanta-tilakam)

क्षणमपि तव सङ्गं न त्यजेदेव देवी
त्वमसि समवयस्त्वान्नर्मभूमिर्यदस्याः।
इति सुमुखि विशाखे दर्शयित्वा मदीशां
मम विरहहतायाः प्राणरक्षां कुरुष्व॥९९॥ (मालिनी)

kṣaṇam api tava saṅgaṁ na tyajed eva devī
tvam asi samavayastvān narma-bhūmir yad asyāḥ ।
iti sumukhi viśākhe darśayitvā mad-īśāṁ
mama viraha-hatāyāḥ prāṇa-rakṣāṁ kuruṣva ।।99।। (mālinī)

हा नाथ गोकुलसुधाकर सुप्रसन्न-
वक्त्रारविन्द मधुरस्मित हे कृपार्द्र।
यत्र त्वया विहरते प्रणयैः प्रियाऽऽरा-
त्तत्रैव मामपि नय प्रियसेवनाय॥१००॥ (वसन्ततिलकं)

hā nātha gokula-sudhākara suprasanna-
vaktrāravinda madhura-smita he kṛpārdra ।
yatra tvayā viharate praṇayaiḥ priyā'rāt
tatraiva mām api naya priya-sevanāya ।।100।। (vasanta-tilakam)

लक्ष्मीर्यदङ्घ्रिकमलस्य नखाञ्चलस्य
सौन्दर्यबिन्दुमपि नार्हति लब्धुमीशे।
सा त्वं विधास्यसि न चेन्मम नेत्रदानं
किं जीवितेन मम दुःखदवाग्निदेन॥१०१॥ (वसन्ततिलकं)

lakṣmīr yad-aṅghri-kamalasya nakhāñcalasya
saundarya-bindum api nārhati labdhum īśe ।
sā tvaṁ vidhāsyasi na cen mama netra-dānaṁ
kiṁ jīvitena mama duḥkha-davāgnidena ।।101।। (vasanta-tilakam)

आशाभरैरमृतसिन्धुमयैः कथञ्चि-
त्कालो मयातिगमितः किल साम्प्रतं हि।
त्वं चेत्कृपां मयि विधास्यसि नैव किं मे
प्राणैर्व्रजेन च वरोरु बकारिणापि॥१०२॥ (वसन्ततिलकं)

āśā-bharair amṛta-sindhu-mayaiḥ kathañcit
kālo mayātigamitaḥ kila sāmpratam hi ।
tvaṁ cet kṛpāṁ mayi vidhāsyasi naiva kiṁ me
prāṇair vrajena ca varoru bakāriṇāpi ।।102।। (vasanta-tilakam)

त्वं चेत्कृपामयि कृपां मयि दुःखितायां
नैवातनोरतितरां किमिह प्रलापैः।
त्वत्कुण्डमध्यमपि तद्बहुकालमेव
संसेव्यमानमपि किं नु करिष्यतीह॥१०३॥ (वसन्ततिलकं)

tvaṁ cet kṛpāmayi kṛpāṁ mayi duḥkhitāyāṁ
naivātanor atitarāṁ kim iha pralāpaiḥ ।
tvat-kuṇḍa-madhyam api tad bahu-kālam eva
saṁsevyamānam api kiṁ nu kariṣyatīha ।।103।। (vasanta-tilakam)

अयि प्रणयशालिनि प्रणयपुष्टदास्याप्तये
प्रकाममतिरोदनैः प्रचुरदुःखदग्धात्मना।
विलापकुसुमाञ्जलिर्हृदि निधाय पादाम्बुजे
मया बत समर्पितस्तव तनोतु तुष्टिं मनाक्॥१०४॥ (पृथ्वी)

ayi praṇaya-śālini praṇaya-puṣṭa-dāsyāptaye
prakāmam atirodanaiḥ pracura-duḥkha-dagdhātmanā ।
vilāpa-kusumāñjalir hṛdi nidhāya pādāmbuje
mayā bata samarpitas tava tanotu tuṣṭiṁ manāk ।।104।। (pṛthvī)

इति श्रीमद्रघुनाथदासगोस्वामिविरचितस्तवावल्यां
श्रीश्रीविलापकुसुमाञ्जलिः
सम्पूर्णः

iti śrīmad-raghunātha-dāsa-gosvāmi-viracita-stavāvalyāṁ
śrī-śrī-vilāpa-kusumāñjaliḥ
sampūrṇaḥ